# परिक्रम

प्रदक्षिण त्रयं देव प्रयत्नेन मया कृतम् ।
यानि कानि च पापानि जन्मान्तर कृतानि च । तानि तानि विनश्यन्तु प्रदक्षिण पदे पदे ॥
आन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्य भावेन रक्षस्य परमेश्वर ॥

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरै-रङ्गै-स्तुष्टुवाँस-स्तनूभिः । व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्ति न पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्योऽ अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥ ओँ शान्तिः शान्तिः शान्तिः ॥

ॐ वाङ् मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि ।
वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः । अनेनाधीतेन अहोरात्रान् सन्दधामि ।
ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु मां ।
अवतु वक्तारं, अवतु वक्तारं ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ आप्यायन्तु ममाङ्गानि । वाक् प्राणश्चक्षुः श्रोत्रमथो बलं इन्द्रियाणि च सर्वाणि ।
सर्वं ब्रह्मोपनिषदम् । माहं ब्रह्म निराकुर्याम् मा मा ब्रह्म निराकरोत् । अनिराकरणं अस्तु ।
अनिराकरणं मे अस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु,ते मयि सन्तु॥

# परिक्रम

ॐ शान्तिः शान्तिः शान्तिः ॥

वेद-मनूच्याचार्यो ऽन्तेवासिन-मनु शास्ति । सत्यं वद । धर्मं चर ।
स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।
सत्यान्न प्रमदितव्यं । धर्मान्न प्रमदितव्यं ॥ कुशलान्न प्रमदितव्यं । भूत्यै न प्रमदितव्यं ।
स्वाध्याय प्रवचनाभ्यां न प्रमदितव्यं । देव-पितृ-कार्याभ्यान्न प्रमदितव्यं ।
मातृ देवो भव । पितृ देवो भव । आचार्य देवो भव । अतिथि देवो भव ।
यान्यनवध्यानि कर्माणि । तानि सेवितव्यानि ।
नो इतराणि । यान्यस्माकँ सुचरितानि । तानि त्वयो पास्यानि । नो इतराणि ।

ये के चास्मच्छेयाँसो ब्राह्मणाः । तेषां त्वयाऽसनेन प्रश्वसितव्ययं । श्रद्धया देयं ।
अश्रद्धया अदेयं । श्रिया देयं । ह्रिया देयं । भिया देयं । संविदा देयं ।
अथ यदि ते कर्म-विचिकित्सा वा वृत्त विचिकित्सा वा स्यात् ।
ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ताः आयुक्ताः । अलूक्षा धर्म कामाः स्युः ।
यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेक्षु । एष आदेशः । एष उपदेशः ।
एषा वेदोपनिषत् । एत दनुशासनं । एवमु पासितव्यं । एवमु चैत-दुपास्यं ।

# परिक्रम

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः ।
नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषं ।
ऋतमवादिषं । सत्यमवादिषं । तन्मामावीत् । तत् वक्तार मावीत् । आवीन्माम् ।
आवीद्वक्तारम् ॥
ओँ शान्तिः शान्तिः शान्तिः ॥